श्रीगुरुभ्योनमः ॥ ॐ ॥ रमासमाश्लिष्टतनुःसमाव्याददव्यंसदव्याजकृपाकटा-
क्षः ॥ दशेक्षत्वत्तामरसाग्र्यवासोहरिर्दशस्यंदननंदनाग्र्यः ॥ १ ॥ यत्तीर्थसंसेव-
नतोभवार्ताःसर्वेभवावैभवतोवसंति ॥ सदाभवंप्राप्यहरिंसमीरमानंदतीर्थंसततं
भजेहं॥२॥अखंडिदुर्वादितमिस्रखंडोगोमंडलैर्व्याप्तरसःप्रचंडः॥त्वद्वन्मंडलस्थंस-
तमोजयार्यमार्तंडउत्खंडयतादखंडं ॥ ३ ॥ स्वयंप्रभातोनिगमार्थसार्थोयस्या-
तिवेलप्रतिभांबुराशेः ॥ तंसत्यनिध्याह्वयतीर्थराजंवंदारुमंदारुमथाभिवंदे ।४।
श्रीसत्यनाथेंद्रसुधासमुद्रोविद्येंदिरामंदिरभावभद्रः ॥ श्रीव्यासरामार्हणवीतनि-
द्रोभूत्यैसभूयादखिलोरुमुद्रः ॥ ५ ॥ सत्कीर्तिसत्याभिनवादितीर्थपदंगुरुंसद्गु-
णरत्नवार्धिं ॥ संपूरिताशेषसदाशमीडेयेनैवमान्योजगतीतलेहं ॥ ६ ॥ श्रीकां-
तकांतासतनामवंतमनंतधीकांतकृतांतसक्तं ॥ अनंतमोदप्रदचारुकृत्यमृषिंत-
मीडेगुरुमंजसाहं ॥ ७ ॥ गुर्वादरोद्भूतमुकुंदभक्त्यैगुरुत्तमश्रीजयतीर्थलीलां ॥

यथाश्रुतीमांमहनीयमान्यांवक्ष्याम्यहंस्वांततमोनिहंत्रीं ॥ ८ ॥ सहस्रवक्त्रैरनु-
वर्णनीयांसंवक्तुकामेजयतीर्थलीलां ॥ संकर्षणेदासतमेल्पबुध्धौसंतोनितांतंकरु
णांक्रियासुः ॥ ९ ॥ सदोत्तमश्लोकशिरोमणीनांचर्यानुवादोखिलकृत्यसारः ॥
कैवल्यबीजंततएषयत्नोजयार्यचर्याकथनेफलंस्यात् ॥ १० ॥ अथाखिलाम्नाय-
महाभिधेयश्रीकांतसद्बोधसुरोत्तमेलं ॥ कालात्कलेरस्तमितेजनेहैंदुर्भाष्यजाला
तितमोभृशांधे ॥ ११ ॥ सन्मुक्तिमार्गात्स्खलतिप्रखिंन्नेखिंन्नांतराधातृमुखाहि-
लेखाः ॥ नारायणंसाधपरायणाग्र्यंशरण्यमायन्शरणंमुकुंदं ॥ १२ ॥ श्रीवल्ल
भोवल्लभमर्हवर्गेसमादिदेशाथसमीरदेवं ॥ रसावतारायसकार्यवीर्यचातुर्यधैर्या-
दिगुणंप्रसन्नः ॥ १३ ॥ श्रीमत्धरेश्वारुनियोगरत्नंमूर्ध्नादधानोभुविमध्यगेहात् ॥
समध्वनामाजनिपाजकाख्यक्षेत्रेपवित्रेरजतासनांके ॥ १४ ॥ पवित्रचित्रस्वकृ
तोरुलीलःसुविस्मितांशेषजनःसबालः ॥ पित्रोपनीतःसमधीतवेदोऽदिताश्रमं-

पारमहंसमाशु ॥ १५ ॥ तपस्विनःसत्सनकादिवंश्यात्प्राप्याश्रमंपारमहंसमेषः ॥
विडंबयन्लोकगुरुःसमीरश्चचारचारुस्वगुरूपसत्तिं ॥ १६ ॥ तदागतान्कर्कश-
तार्किकाग्र्यान्जित्वासलीलंगुरुमच्युतेक्षं ॥ सुविस्मयंस्वप्रतिभांप्रदर्शयन्नधीत-
विद्यान्सखिलाकरोत्तं ॥ १७ ॥ अलौकिकस्वप्रतिभाविशेषप्राप्ताद्भुतेनाच्युतवी
क्षणेन ॥ वेदांतसाम्राज्यपदावनेथाभिषिक्तआसीद्दरगामृतैस्सः ॥ १८ ॥ गोत्रा
तलेसर्वसदस्यथालंजैत्रान्जयन्पाक्षिवरान्सलीलं ॥ क्षत्राद्यधोशंसनमन्स्वपालंजै
त्रश्चचाराखिलपावनोलं ॥ १९ ॥ सुचित्रकर्माहारिशमकारीसशर्मतीर्थोहारिगीत
भाष्यं ॥ निर्मायगत्वाबदरीशमस्माउपायनप्रार्प्पयद्‌शतंनमन् ॥ २० ॥ अती
तसीताचलएषआशुगतस्ततोन्यांब्रदरीमुदारां ॥ तत्राश्रमपश्यदुदारमारोपमंह-
रिंसत्यवतीकुमारं ॥ २१ ॥ शाखोपशाखादलपल्लवादसंशोभिनानातरुवारिचा
रौ ॥ पिकैःशुकैःकेकिभिरप्यनेकैरन्यैर्द्विजैर्देवमुनीश्वरांशैः ॥ २२ ॥ वसंतपूर्वर्तु-

कुळप्रभूतप्रभूतपुष्पादिकयाविभूत्या ॥ विभ्राजमानेयुगपत्सदैववनप्रवेकेत्स्हृत-
सूर्यकार्यै ॥ २३ ॥ सुविद्रुमाकारफलालिसांद्रपलाशराजद्दराद्रुमाधः ॥ वित-
र्दिकायांमुकुरोपमायांविशंकटायामतिसुंदरायां ॥ २४ ॥ चित्रासनस्छंवरयोग-
पट्टंसुरेश्वरक्तांघ्रितळंसुगुल्फं ॥ श्रीसेव्यजंघंवरजानुयुग्ममनौपमोरुंकटिमौंजि-
बंधं ॥ २५ ॥ गंभीरनाभ्यब्जवलित्रयेतंतनूदरंसूरसमब्जकंठं ॥ बृहद्भुजंमंजुळपी
वरांसंसमुद्धिरंतंनिगमाननंतान् ॥ २६ ॥ रक्तांबुजाभाभयबोधमुद्रालसत्करोद्यं
नखभानुवृंदं ॥ लसत्प्रवालोष्टपुटांतरुद्युत्कुंदाभदंतावलिमुच्चनासं ॥ २७ ॥ कं
जायताक्षंकमनीयकर्णकपोलयुग्मंतिलकतफालं ॥ सुभ्रूविलासंस्मितभासुरा-
स्यंशिरोल्लसत्पिंगजटाकलापं ॥ २८ ॥ हरिन्मणिश्यामलमैणचर्मवरंवसानंसु-
गुणंविदोषं ॥ कर्तारमीशंवरभारतादेःश्रीब्रह्मसूत्रस्यचदेवदेवं ॥ २९ ॥ सदाग
मार्थश्रवणायजुष्टंसुरैर्मुनींद्रैःपरितोनिषण्णैः ॥ स्वास्याचलोद्भूतसरस्वतीसंप्रपूरि

ताम्रश्मसहस्त्रकूपं ॥ ३० ॥ पश्यन्नपिस्वेत्हृदयेनिशांतंवीक्ष्यप्रणम्यादरतःसहृ--
ग्भ्यां ॥ अगाधबोधोहरिणोपगूढस्तेनोपविष्टोभवदंतिकेस्य ॥ ३१ ॥ अनंतवे--
दानुपसत्तिपूर्वमनंतबोधात्स्वशृणोत्सतस्मात् ॥ अनंततोज्ञाततदर्थभावस्त्वनंत
जन्मार्जिततत्प्रसादात् ॥ ३२ ॥ अनंतवेदाद्यमितार्थबोधप्राचीनमेवोरुविशेषवं
तं ॥ पुनःपुरस्तादपिपूर्णबोधोव्यासप्रसादाव्द्यतनोदधीत्या ॥ ३३ ॥ सत्रात-
तःसत्यवतीसुतेननारायणंप्राप्यकृतांतसूनुं ॥ वीक्ष्याननाभिषपराश्रमस्थंध्याय-
न्नभिन्नंसकलावतारैः ॥ ३४ ॥ सभाजितश्रीहरिसूत्रभाष्यमुखान्प्रबंधान्विरच
य्यसाधून् ॥ समुत्धरायीत्यमुनासवेदव्यासाग्रलोभाण्यतिहार्दपूर्व ॥ ३५ ॥
ॐमित्यथाज्ञाशिरसाकलय्यहर्यंशयोर्धर्ममुनींद्रसून्वोः ॥ तरन्सुदुर्गान्विपिना-
द्विवर्गानिमांधरामारसवातवेगः ॥ ३६ ॥ अदूष्यमन्यैर्हरिसूत्रभाष्यंप्रशुष्यमज्ञ
तरलोकवर्गैः ॥ विधायवेदेशमतंससाधून्समुद्धधारैतदुदीरणेन ॥ ३७ ॥ गोगो

लसंस्छाखिलवादिसिंहान्सग्रामसिंहोपमितान्वितन्वन् ॥ वादेभिभूतान्समयि-
प्रबर्हो गोदावरीतीरमवापधीरः ॥ ३८ ॥ अशेषशाखासमयज्ञराजं विशेषमात्मी
यमवेक्ष्य नम्रं ॥ वादे जितं शोभननामधीरं शिष्यं वितेने गुणशोभनं सः ॥ ३९ ॥
तस्मै प्रसन्नः परिचर्यया न्यैर्गुणैश्च विद्यामुपदिश्य सद्यः ॥ सवेदवेदांतकृतांतराज्य-
पातीं वितेने चरमाश्रमं तं ॥ ४० ॥ एवंविधान्साधुजनानसंख्यानदभ्रसंख्योऽवरत
त्वसंख्यान् ॥ यतिप्रवेकान्गृहिणोप्यनेकान्वादाभिभूतानकरोत्स्वशिष्यान् ॥
॥ ४१ ॥ आभादनंतालयकैरवालं तत्तासमंतादखिलोडुरत्नैः ॥ तत्तं बतानंत-
मिवैह्यनंतैः शिष्यैः प्रशिष्यैरमितोपलब्धेः ॥ ४२ ॥ इत्थं सदार्यः कृतदेवकार्यः स-
कार्यवीर्योमितबोधसूर्यः ॥ अभात्सुधैर्यो जितवादिवर्यः पवित्रचर्योरिकुलैरवार्यः ॥
॥ ४३ ॥ स्वदत्तयत्याश्रमपद्मनाभतीर्थाभिधं शोभननामकं प्राक् ॥ वेदांतविद्या-
निजराज्यपालविद्यासमुद्रं समकल्पयद्यसौ ॥ ४४ ॥ साम्राज्यभारं विनिवेश्य तत-

स्मिनृजुप्रधानोबदरीमुदारां ॥ गत्वाश्रमेतत्रनिषेवमाणोनारायणंव्यासमसौ-
किलास्ते ॥ ४५ ॥ आनंदतीर्थार्यकराब्जजातमरंदसंसेव्यसपद्मनाभः ॥ मोदं-
ददत्सज्जनषट्पदानांविदांतसाम्राज्यमपीपलत्कौ ॥ ४६ ॥ ततोनृहर्याव्हयभि-
क्षुराजोव्याख्यानसंमोदितसत्समाजः ॥ दुर्वादिदंतींद्रमृगाधिराजःस्वदेशकर्मत्त
पस्तोरराज ॥ ४७ ॥ आपादतोमाधवतीर्थनामाश्रीपादतोमध्वकृतांतराज्यं ॥
आपारिजातोनिजपारिजातःसत्पारिकांक्षिप्रवरोधरायां ॥ ४८ ॥ श्रीमन्मध्व-
कृतागमांबरचरःश्रीमाधवःश्रीपदाकूपारादुदितोल्हतामतमतध्वांतःस्वगोभिःस्व-
रैः ॥ विद्वत्तामरसप्रियोलसदलंसोक्षोभ्यतीर्थाव्हयापूर्वानंतमणिस्ततस्ततयशाः
प्राज्यप्रकाशोवनौ ॥ ४९ ॥ शेषाचार्यसुतश्रीमत्संकर्षणकृतेशुभे ॥ जयतीर्था-
र्यविजयेसर्गःप्राथमिकोजनि ॥ ५० ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ ७ ॥

श्रीगुरुभ्योनमः ॥ ॐ ॥ अक्षोभ्यतीर्थउरुहंसकुलावतंसःसंक्षोभिताखिलकुप-
क्षिगणोऽज्ञसासः ॥ अक्षीणपक्षइहकौदशबोधदासःप्रक्षीणकाममुखदोषकुलोल्ल-
लास ॥ १ ॥ कालेतदैवकिलरंगपदश्वधामनामेत्युभाववनिदैवतकावभूतां ॥
ईर्ष्याद्यवद्यकलहार्जितविप्रहत्यौलोकैर्बहिष्कृततमौस्वपरैर्द्विजत्वात् ॥ २ ॥ त-
तौतदागुरुवरंसमुपेत्यनत्वासंप्रार्थनंह्यवदतामितिनिष्कृतिंनौ ॥ हत्यात्मकस्य-
दुरितस्यवदंतुनाथाःशापप्रसादकरणेप्रभवोभवंतः ॥ ३ ॥ ताभ्यामितीरितउ--
वाचयतीश्वरस्तौतत्स्वांतगानुपरितापपरीक्षणेच्छः ॥ अस्यैनसोनहिविनिष्कृति-
रस्तिशास्त्रेदेहांततोबतपरेत्यखिलज्ञराजः ॥ ४ ॥ तेनेरितावितिमृतेर्भयतोवि-
मुक्तौदेहांतमेवभवतांपुरतोत्रकुर्वः ॥ तर्हीत्युदीर्यतरुमभ्रदलस्पृगग्रमारुह्यपात-
मनसौकिलतावभूतां ॥५॥ तर्वग्रगावदतामितिपातहेतोराज्ञांदिशंतुभवतांपु-
रतोधपातं ॥ कुर्वेस्त्रिवारमितितद्वचनंतपस्वीह्याकर्ण्यसोवददधोनयशास्त्रवि--

४

न्तौ ॥ ६ ॥ एतंयुवांसमवरुह्यतरोरतोमांनूनंद्विजौनपततंभवतोर्हिदार्ढ्यं ॥ ज्ञातं-
स्त्वदोध्रुवमितीरितमाकलय्यतावागतौतमवरुह्यततःकिलागात् ॥ ७ ॥ शाप-
प्रसादकृतिदक्षतमस्ततोसावक्षोभ्यतीर्थमुनिराट्दरवारिणालं ॥ संशोध्यविप्रह
तिसर्वबहिष्कृतौतावायापयत्किलमहामहिमाद्भुतंतत् ॥ ८ ॥ नज्ञातयोपरज-
नाअपितावगृण्हन्पूतीकृतावपिमहामुनिनामुनातौ ॥ क्षोणीपरिक्रमसुखागत-
किल्बिषत्वौशुत्धावनेनकिलहेत्यपहासकाराः ॥ ९ ॥ भूयस्तमेत्यकिललोकब-
हिष्कृतौतावक्षोभ्यतीर्थमुनिमूचतुराप्ततापौ ॥ सर्वांप्रवृत्तिमथतांमुनिराण्णिश-
म्यमाहात्म्यमक्षमतमाचरितुंसदध्यौ ॥ १० ॥ आकार्यपामरजनानखिलान्सऊ
चेयोद्वापरोस्तिकिलमामककृत्यएषः ॥ सन्नाश्यतेश्रुणुतमद्वचनंतथादौवस्त्रंस-
मानयतरेरजकाद्वलक्षं ॥ ११ ॥ तेनेरिताइतिजनारजकालयात्तआनीयशुभ्रव-
सनंमलिनंवितेनुः ॥ भल्लातकप्रभवतैलविलिंपनेनतत्सद्गुरोर्वचनतोद्भुतकृत्यवा

धैः ॥ १२ ॥ कंचिद्द्विजंनिजवशंविरचय्यसर्वतीर्थानिगंतुमथनीलतमंपटंतं ॥ द-
त्वाप्लुतंविचिरकेषुतदीयकेष्वित्युक्त्वागुरोर्वचनतस्तमयापयंस्ते ॥ १३ ॥ क्षोणी-
तलस्थितसमस्तसुतीर्थकेषुकृत्वाप्लुतंतमथनीलतमंद्विजःसः ॥ आयादिहागतम
लीमसभावमेनमादायतद्गुरुपुरःसमदर्शयच्च ॥ १४ ॥पश्यत्सुतत्रनिखिलेषुजने
ष्वथायमक्षोभ्यतीर्थमुनिराट्दरवारिणैव ॥ एतच्चकाररजकालयतोहिसद्यआ--
नीतमंबरमिवैतदलंनुचित्रं ॥ १५ ॥ प्रत्यक्षमित्थमभिवीक्ष्यमहामहित्वमक्षो--
भ्यतीर्थमुनिराजगमाप्तचित्राः ॥ क्षाम्यंतुमंतुमितिसर्वजनाउदीर्यतंसंप्रणम्यवि
मतौद्विजकावगृण्हन् ॥ १६ ॥ एवंविधाद्भुतचरित्रनिधिंयतीशंस्वप्नेभ्युपेत्यतमु-
वाचहरिप्रसन्नः ॥ कारुप्रधाननिलयस्थितविठ्ठलार्चांभिक्षोगृहाणरुचिरापघना- ५
मितिस्म ॥ १७ ॥ मत्संनिधीतशुभविठ्ठलमूर्तीमितामक्षोभ्यतीर्थपदभिक्षुवराय
देहि ॥ कारोत्वयाविरचितामितिवाचमूंचस्वप्नेतथास्यनचसंस्पृशतामितस्त्वं ॥

॥ १८ ॥ स्वप्नोत्थितःसकिलकारुरवाप्तचित्रःप्रातस्तमेत्यगुरुराजमभिप्रणम्य ॥
स्वप्नेस्वदृष्टमखिलंनिगदंन्ययाचेगृण्हंतुमेभवनमेत्यमदीयमूर्तिं ॥ १९ ॥ तेनार्थि
तःस्तदनुकूलनिजानुभूतस्वप्नाश्चकौतुकसरस्वातिसंनिमग्नः ॥ कारुप्रवेकगृहवास्य
समाप्तकिंचित्तव्द्याप्टतिंसजगृहेप्रतिमांहरेस्तां ॥ २० ॥ दैवात्प्रसन्नहरिचोदित-
कारुदत्तांश्रीविठ्ठलस्यसमपूजयदर्चिकांतां ॥ आनंदतीर्थकरपूजितविग्रहाग्र्यैर-
श्रांतमेषविरचय्यहिसुप्रतिष्ठां ॥ २१ ॥ योनेकतंत्रविदुषांप्रवरोधरायांविद्यासुय
स्यविविधासुसदृक्चनासीत् ॥ योजान्गजाधिपइवाकृतवादेराजान्वेदस्यभा-
ष्यमकरोदखिलस्ययोहि ॥ २२ ॥ अक्षोभ्यतीर्थयतिराडखिलैरभेद्योदवीदिवा-
रणविदारणकेसरींद्रः ॥ सत्तत्वमस्याभधवागसिनास्मविद्यारण्यछिनत्तिपरजीव
विभेदिनातं ॥ २३ ॥ श्रीरामचारुचरणाचलपादसंगीदुर्वादिवारणविदारणकृ-
त्यदक्षः ॥ सोक्षोभ्यतीर्थमृगराड्वचनप्रणादात्व्यद्रावयदशदिशःकिलमायिफे

ज०ती० रून् ॥ २४ ॥ एवंचरन्नवनिमंडलमेषभिक्षुःकुर्वन्सतोरिदरमुद्रितबाहुमूलान् ॥ वि०स०
६ पूतांश्चदर्शनसुभाषणपूर्वकृत्यैश्रीभीमरथ्यमलतीरमयात्कदाचित् ॥ २५ ॥ श्री- २
भीमरथ्यभिमुखप्रसरत्तरंगहस्तैःस्वघोषवचसाऽऽह्वयतीवरेजे ॥ आश्वेहिमज्जम-
यिरामसमर्चनेनमांत्वंपुनीहियतिपेतितपस्विराजं ॥ २६ ॥ मुक्ताफलोपमपृष-
त्प्रकरोपहारंश्रीभीमरथ्युरुतरंगकरैस्तदासा ॥ अक्षोभ्यतीर्थयतिपार्चितदेवता-
र्चावृंदाग्रतोर्पितवतीवसमुल्ललास ॥ २७ ॥ श्रीपुंडरीकनयनंवरपांडुरंगंसत्पुंडरी
कवरदंनिजतीरवासं ॥ स्तौतीवघोषवचसापरिनृत्यतीवयोलोलकैरतिचलैर्हि-
सरित्सुधन्या ॥ २८ ॥ तत्सारतीरगतमेत्यसुपांडुरंगक्षेत्रंतदालयहरिंकमनप्रती
कं ॥ अक्षोभ्यतीर्थयतिराडथपांडुरंगनामांकितंसमनमत्सपरिक्रमंसः ॥ २९ ॥ ६
श्रीभीमरथ्युरुसरिन्मरुतातिपूतवासोर्चितंससमुवासचिरंतपस्वीट् ॥ सत्पंडित-
प्रकरमंडितपांडुरंगेश्रीपांडुरंगपदसारसचंचरीकः ॥ ३० ॥ श्रीशंकरागमकरार्च-

तदेवतार्चाअर्चभिरंस्वविहिताचरणातिकांतः ॥ सत्पुंडरीकवरदंवरपांडुरंगंसप्री-
णयन्निहतपस्विवरःसतेपे ॥ ३१ ॥ श्रीशप्रियोत्तममरुत्प्रवरावसारप्राज्योपल--
विधमतसज्जनपूज्यराज्यं ॥ कौशासतोत्रतपतोस्ययतीश्वरस्यस्वप्नेसमक्षमवद-
त्किलकश्चनेति ॥ ३२ ॥ श्वोम्बुधुनीमिहसमेष्यतिभूतिशालीसार्दीद्रवृंदसहितो
श्ववराधिरूढः ॥ कश्चित्वदीयपदपालनपात्रमंगत्वंयौवराज्यमविचार्यदिशाशुत-
स्मै ॥ ३३ ॥ अत्यंतपूतपितृमातृकुलःशुभोसावेत्यश्वआशुसरिदंबुविशन्गभी-
रं ॥ आरूढतुंगतुरगोध्रुवमंबुपास्यत्यास्येनपाणिपुटमध्यपहायकामं ॥ ३४ ॥
आकार्यसच्छमदमादिगुणंप्रभुंतमेनंदिशाशुचरमाश्रममागतस्मै ॥ सत्यंमयेरित-
मिदंश्रुणुमत्प्रसादात्छिष्योभवेद्वितकीर्तिकरःसनूनं ॥ ३५ ॥ प्रातःसविस्मय-
सरस्वतिसंनिमग्नोश्रांतंविचिंतितकृतेरनुकूलमासीत् ॥ स्वप्नाभिदर्शनमिदंस्वगु-
रुप्रसादादित्थंगुरूपकृतिमास्मरतिस्मभूयः ॥ ३६ ॥ प्रातर्यदेत्ययतिराट्ससरस्व-

तींतांतत्रावगाह्यजपनिर्जरपूजनादि ॥ संनिर्ममेसमधिरूढतुरंगतुंगःसोत्रागमत्प्र
भुवरःसहसादिवृंदः ॥ ३७ ॥ सूष्णीषवर्मविमलांबरहारमालीचारुप्रतीकनिच-
योखिलदृश्यरूपः ॥ लीलाबहिर्गमनदृत्सहितत्रतत्रस्वैरंचरन्प्रभुवरःसहचारुच
म्वा ॥ ३८ ॥ मध्यंदिनस्छमिहरोरुकरप्रतापश्रांतस्तृषाशुवरभीमरथीसमेत्य ॥
अश्वस्थएवभृशनिम्नजलेप्रविष्टःसंयोज्यवारिपिबतिस्ममुखेनगोवत् ॥ ३९ ॥ त
दाददर्शकर्मंदिसंवंद्योक्षोभ्यतीर्थराट् ॥ सरिदंतस्तमाविश्यपिबंतंपशुवत्पयः ॥
॥ ४० ॥ स्वप्नदृष्टमृतमेवमयाभूदित्यलंकिलसमस्करिराजः ॥ आननंदमरुदं
शसुवंशांभोधिवृद्धिकृतिचारुसुधांशुः ॥ ४१ ॥ शेषाचार्यसुतश्रीमत्संकर्षणकृ-
तेशुभे ॥ जयतीर्थार्यविजयेसर्गआसीद्द्वितीयकः ॥ २ ॥ ॥ श्रीकृष्णार्पणमस्तु ॥

श्रीगुरुभ्योनमः ॥ अथतृतीयःसर्गः ॥ ३ ॥ नानावृत्तेनवर्ण्यते ॥ (इंद्रवज्रा)

ॐ तत्तापसेनेननिजाश्रवेणाथाकारितेनागमितेनतूर्णं ॥ शमादिसंपत्तिमतादरेण
प्रभुप्रवेकेनसतांमतेन ॥ १ ॥ (उपेंद्रवज्रा) वरूथिनींस्वामपहायदूरेगुरूत्तमा
क्षोभ्यपदेतदाप्य ॥ उरूपदेशार्थमभिष्टदेवतरूपमेप्राणमितेनभक्त्या ॥ २ ॥
(भुजंगप्रयातं) नृशृंगंविनीतंनयेतंनमंतंसतोक्षोभ्यतीर्थाख्यपूज्यांघ्रिणातं ॥ स-
मामेदिनिर्वर्ण्यसोमाननितेनप्रसंन्नाननेनाथचारूक्तिपूर्वं ॥ ३ ॥ (युग्मविपुला)
अनुसंदधतास्वप्नेपूज्यपुंसासमीरितं ॥ तेनश्रीचरणेनाथोवाणीत्याभाणितांकिल-
॥ ४ ॥ (द्रुतविलंबितं) अयिनृशृंगमदीयरघूत्तमस्तवकरेणसमर्हणमीहते ॥
सततभद्रनतिर्भवताभवद्दशादिशाततदिव्ययशाभव ॥ ५ ॥ (सृग्विणी) आ-
श्रमंस्वीकुरुष्वांतिमंभोप्रभोरामदेवप्रियंकामितार्थाकरं ॥ तेननूनंभवेसर्वजी-
वोत्तमश्रीमदाचार्यपूर्णानुकंपास्पदं ॥ ६ ॥ (आद्यपादेंद्रवज्रा) भूत्यामहत्या-
समयासमेतोगजप्रवेकादिकयानृसिंहः ॥ सनम्रमूर्धाकलितांजलिस्तंगुरुंसमूचे-

चतुरस्तदेति ॥ ७ ॥ (प्रमिताक्षरा) किमहंब्रवीमिपुरतोभवतामियमर्चिका--
क्करघुवंशपतेः ॥ प्रभवःक्वनूनमहमज्ञतमोनाधिकार्यहोकथमिदंनुभवेत् ॥ ८ ॥
(प्रहर्षिणी) एवंसत्यपियदिरोचतेमुनीनामेतच्चेतसिभवतामहंकरिष्ये ॥ स्व-
प्नस्यादिहममचाद्यतर्हिनाथाःएतस्मात्किमितरदस्तिकामनार्हं ॥ ९ ॥ (वसंत
तिलका) अक्षोभ्यतीर्थयतिराडितिगांनिशम्यतस्यप्रभोःपुनरुवाचतथैवतेस्यात्
॥ स्वप्नोद्यमंनिकटएववसामरोरुनैवेद्यमभ्यवहरांगनृशृंगहीति ॥ १० ॥ (नग-
स्वरूपिणी) इतीरितःससांत्वनंनिधायचक्रमात्मनः ॥ तदंतिकेवसत्ससत्सुमं--
त्रितोरुभक्तिभुक् ॥ ११ ॥ (शालिनी) वीक्ष्यस्वप्नंतद्दिनेसौतथैवाचित्रंप्राप्तश्चिं
तयन्तन्महत्वं ॥ नानासंपत्छाल्यविप्राप्तधैर्योसत्सौख्याशामत्यजच्छ्रीशचेताः ॥
॥ १२ ॥ (इंद्रवंशं) अक्षोभ्यतीर्थोदितवर्त्मनाततस्तुर्याश्रमायाकृतपूर्वभागि-
नीं ॥ दीक्षांप्रलभ्यस्वबलांकृताह्निकास्तदंतिकेतद्दिवसेवसन्सुधीः ॥ १३ ॥

(सुंदरी) अथपारमहंस्यमाश्रमंप्रगुणायप्रवणायभिक्षुराट् ॥ प्रयतायदिशंनु-
पादिशत्सपरंब्रह्मपरेदिनेकिल ॥ १४ ॥ (वंशस्थं) समित्करस्याकलितांजलेः
शुचेःकेसव्यधाच्छ्रीकरसारसारसं ॥ महातपस्विप्रवरप्रसंनत्त्वद्यदातदासौव्यलस
द्व्रतोपमः ॥ १५ ॥ (पृथ्वी) अनंतनिगमागमार्थवरपूजितानंतत्वन्महीपतिनि
जागमोत्तमगृहावनार्थैवसः ॥ कुवादिकुलमोषकावलिदरंदधारादरात्स्वतीर्थपर-
माज्ञयाविमलवंशदंडंकिल ॥ १६ ॥ (पुष्पिताग्रा) सुखमुनिजनसाधुधेनुवृं-
दावनमनसेवदधारदंडमग्र्यं ॥ कुमुतविपिनगोत्रचारिवारीव्रजकुमृगावलिभी-
षकंसएषः ॥ १७ ॥ (प्रथमतृतीयपादोपेंद्रवज्रा) गुरुप्रदत्तंजयतीर्थनामतस्मै
यदासीदनुरूपमेषः ॥ जयोनुपात्रंजयकृच्चमाध्वंतट्टीकयाशेषविदांहितार्थ॥१८॥
(प्रथमतृतीयपादोपेंद्रवज्रा) प्रयच्छदच्छंकिलरागराजदासस्तदास्मैजयतीर्थना-
म्ने ॥ गुरुस्वतस्मिन्निदधेस्वरागमूर्तिंविशालंममधीरितीह ॥ १९ ॥ (मालिनी)

उदितमिहिरधामासांध्यजीमूतवासाःविलसितकटिसूत्राधारकौपीनशाली ॥ पि-
तृमुनिसुरसभाषढपाणिस्तदाभाद्विवरवसनसूनाकल्पकोप्येषचित्रं ॥ २० ॥
(चंद्रिका) गुरवेमहतेनिजायसाष्टांगमथानम्यमुनावराश्रमेणा ॥ अनुसंदधता
हमास्मिधन्योनुगृहीतोद्यकिलैभिरंजसेति ॥ २१ ॥ (मंदाक्रांता) श्रीमन्माता-
पितृमुखजनेबांधववर्तमानेकांतायुग्मेकमलवदनेचार्वशेषप्रतीके ॥ तारुण्येलंर-
जतकनकाधारिकैवैभवेपिन्यस्ताशेषोयतिरयमभूत्सैवलोकेविरक्तिः ॥ २२ ॥
(शार्दूलविक्रीडितं) सत्रैताकिलतत्रतेनतदिनासेनाथवाचंयमीभूतंन्यस्तसम-
स्तराजविभवंनिर्वर्ण्यविस्मेरतां॥ लब्ध्वागाढमभूदिदंकिमहहेत्येवंब्रुवंतीमुहुस्त-
त्पित्रेन्यगदन्मुदंतकमितोदंतंसमस्तंद्रुतं ॥ २३ ॥ (प्रथमद्वितीयतृतीयपादापें
द्रवज्रा) सआकलय्यात्ममुदंतकंतमुदंतमात्मीयमुखादसह्यं ॥ शुचाभितप्तो-
निपपातमह्यांछिंनस्वमूलोविटपीवसंनः ॥ २४ ॥ (वंशस्थं) समित्धरोषातिश

याशुशुक्षणिःसोक्षोभ्यतीर्थेंद्रतपोंबुधिंततः ॥ दग्धुंसमायात्किलसेनयाह्यमा--
शोकाभिभूतस्यकुतोविवेकिता ॥ २५ ॥ (प्रमिताक्षरा) प्रतिघाग्रहावृतमनाग
लितस्वपरात्मधीःपरमहंसपतिं ॥ गिरमित्यथागददसौपुरुषांनुरुशोकशोषित--
त्दृदोष्टपुटः ॥ २६ ॥ (स्वागता) हंसराजतनयंममबालंमुंडितंत्वमकरोःप्रसभं
यत् ॥ संपदानुपमयाखिलयेतंत्वांनिहन्मिपरमानयशीलं ॥ २७ ॥ (इंद्रवज्रा)
इत्यादिदुर्भाषितमाकलय्यमत्यासमस्तंजयतीर्थऊचे ॥ यत्याश्रमोमेप्रसभान्नद
त्तोयत्यार्यकैरेभिरतोन्यथाना ॥ २८ ॥ (इंद्रवज्रा) स्वप्नेद्भुतःपंचजनोममाग्रे-
वाणीमभाणीदितिसंग्रहाणा ॥ अप्याश्रमंपारमहंस्यमेवंचेत्स्याच्छिवंतेपरथान--
चैतत् ॥ २९ ॥ (शिखरिणी) तदैवोचेगांतंमहितचरणोक्षोभ्यपदयुक्मया--
न्यायोनूनंप्रभुवरकृतेनैवतनये ॥ इदानींकिंजातंपुनरपिगृहांस्तेनसहितंपुरेवैनं-
कृत्वायोदिचममतास्यात्तवसुते ॥ ३० ॥ (अंत्यपादोपेंद्रवज्रा) शुश्रोषधूतस्व-

परावबोधोनिर्भर्त्स्यतंश्रीचरणंस्वपुत्रं ॥ सूषणीषवर्मादियुतंविधायनिनायगेहंज-
यतीर्थराजं ॥ ३१ ॥ (मालिनी) कमनशयनगेहंयापयित्वाजयार्यंमदनदृद-
यमोदांयापयामासभार्या ॥ निकटमथकिलैतत्तातएवान्हितस्मिन्निशिसुरतम-
नासाभ्याशमायात्स्वभर्तुः ॥ ३२ ॥ (विद्युन्माला) कांताहोतंकांतंवत्स्येद्राक्षी
त्तस्मिंशय्यायांसा ॥ फूत्काराेच्चस्वानोपेतोदाराहीशाकारंभीमं ॥३३॥ (प्रथम-
चतुर्थपादोपेंद्रवज्रा) क्षणांतरेसापुनरेवतत्रजाज्वल्यमानज्वलनोपमंतं ॥ आ-
क्रंददालोक्यससंभ्रमाहोहतास्मिहाहेतिमुहुर्गदंती ॥ ३४ ॥ (दोधकं) बंधुज-
नेतांकिमभवदित्थंपृच्छतिसोचेखिलमनुभूतं ॥ गेहतएताबहिरथतस्मात्कंपवती-
गद्गदवचनेता ॥ ३५ ॥ (रुचिरा) अवाप्तवानतिकुतुकंजनोखिलःश्रुततदद्भु--
तवचनोवदत्तदा ॥ यतिर्यतःपुनरिहसंसृतावयंनचोचितेध्रुवमितिभातिकार्यतः॥
॥ ३६ ॥ (प्रथमतृतीयपादोपेंद्रवज्रा) नितांतचिंतेजयतीर्थतातेसंध्येब्रवीत्क-

श्वननाभवत्सु ॥ इतःपरंनार्हइयंतमासीत्कालंमहानेषमहावृषेणा ॥ ३७ ॥
(स्रग्धरा) इत्याद्यालोक्यसंध्येभृशमितकुतुकःश्रीजयार्यस्यतातोह्यालाच्यालो
च्यांचित्तेनिजसुतविरहंशंकमानोतिशोकः ॥ किंकुर्मःकंव्रजामःशरणमशरणाःश्री
हरीछोतिचेतस्यादित्थंलब्ध्वाविवेकंसुधृतिमपिसुताशांचतत्याजनूनं ॥ ३८ ॥ (च-
पला) इत्यामनेनाथोनयतिनैषोक्षोभ्यपदंगुरुंस्वसुतं ॥ मंतुंक्षाम्यंत्वीशानयति-
गदन्प्रार्थनमतिस्म ॥३९॥ (शार्दूलविक्रीडितं) इत्थंप्राप्तमनोरथोविमलधरिक्षो
भ्यतीर्थाह्वयःश्रीपादोजयतीर्थराजसहितःपृथ्व्यांजयन्वादिनः ॥ श्रीमध्वार्चि-
तवेदपोपलगणःश्रीमूलरामार्चिकापूर्वार्चार्चनपूर्वकर्मविदधद्रेजेमहानंदवान् ॥
॥ ४० ॥ शेषाचार्यसुतश्रीमत्संकर्षणकृतेशुभे ॥ जयतीर्थार्यविजयेसर्गआसी-
त्तृतीयकः ॥ ४१ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

श्रीगुरुभ्योनमः ॥ विनयपूर्वकसद्गुणवारिधिर्विमलधीर्जयतीर्थयतीशिता ॥ नि
जगुरोरुपसत्तिमथव्यधाच्छ्रुतिपतेःसुखतीर्थइवादरात् ॥ १ ॥ तमुपसंनमवेक्ष्यगु
रुर्महानचिरमेवसमस्तपुमार्थदं ॥ निजकरांबुजजंकरुणारसंन्यधितपात्रवरेननु
तत्रसः ॥ २ ॥ अखिलसंनिगमागमगोचरासमुदभूत्प्रतिभाभगवत्प्रिया ॥ गुरु-
कृपावरमंदरलोडिताद्भुतमथोजयतीर्थपयोंबुधेः ॥ ३ ॥ सुखकरंजयतीर्थसुधाक
रंतमवलोक्यगुरुर्गुणरत्नधीः ॥ प्रमदतुंगतरंगकुलैरलंसववृधेकिलकीर्तिपयोध--
रः ॥ ४ ॥ प्रकटितप्रतिभातिशयायसच्छतमनीषकृतांतमथोगुरुः ॥ प्रगदतिस्म
शमादिमतेमहाप्रियतयाजयतीर्थतपस्विने ॥ ५ ॥ भवमहार्णवतारकवीरितस्व-
गुरुसत्करुणातरणेर्बलात् ॥ सपरपारमथाचिरमारसदशस्तदागमरत्नपयोनि--
धेः ॥ ६ ॥ अथमहान्जयतीर्थमृगाधिराट्समयिमत्तमतंगजमंडलं ॥ भुविममर्द-
महादरदोनिजप्रवचनेस्वनतोपरसाध्वसः ॥ ७ ॥ गुरुकृपामृतसेकसमाधितास-

जयतीर्थसुधाशतरुर्गवि ॥ वरयशःप्रसवैर्हरितांमुखंसुरभिसव्यधिताखिलकामदः ॥ ८ ॥ जयतितज्जयतीर्थयतीश्वरेपरविदांनबभूवभुविप्रभा ॥ शलभभाधिपपावकभादिनांभुविविवस्वतिगांमतिसूदिते ॥ ९ ॥ प्रमदतीर्थमतावनपेशलंसजयतीर्थगुरुर्गुणभूषणं ॥ जयपदंनिजशिष्यमवेक्ष्यतंस्वमतिवेलकृतार्थममन्यत ॥ १० ॥ स्वगुरुदत्तसुरप्रतिमादिकानुपमसंपदितोजयतीर्थराट् ॥ भुविसदिग्विजयायतदातदाकिलचचारतदीयवराज्ञया ॥ ११ ॥ सशुशुभेदिविहंसइवावनौकुमतजालतमोहरगोगणैः ॥ विमलपादसुपूतमहाजनःश्रुतिमतार्थिवरालिनिदर्शकः ॥ १२ ॥ स्वपदनीरजनीररजोगणैरनलतप्तवरादिदरादिभिः ॥ समपुनज्जनतांसतदातदावनितलेभगवान्सकलांकिल ॥ १३ ॥ प्रवचनोरुनिनादभयंकरेचरतिकौजयतीर्थमृगाधिपे ॥ शमलभंतनमायिशिवाःखलाःप्रखरताकिंकमत्तगजाअपि ॥ १४ ॥ इतिदिशांविजयंसतदातदाक्षितितलेविरचय्यगुरुस्व-

कान् ॥ अभिगतःसमनंदयदर्पयन्वसुकुवादिजयंजयतीर्थराट् ॥ १५ ॥ इहज
नाङ्घातहासमितिश्रुतिप्रमददंनिगदंतिमनोषिणः ॥ वृषभएषपुरापरिपूर्णतद्दत्तस-
मयपुस्तकभारभरःकिल ॥ १६ ॥ सपरिपूर्णमतिःस्वकृतागमप्रवचनंव्यधितानि-
शमेषके ॥ वृषवरेस्वपुरोजिरबंधनेविमलचेतसिशृण्वतिभक्तितः ॥ १७ ॥ कलि
युगेखलुमंदाधियोजनाअतिगभीरवरार्थखनेरिनाः ॥ भवदुदारकृतेःप्रतिपङ्क्तितत्क-
थमितिस्वजनायविपृच्छते ॥ १८ ॥ सनिजगादकदाचिदगादधीर्वृषभराडयमेव-
करिष्यति ॥ विवरणानिमदीयकृतेर्भवेत्प्रतिपदर्हजनस्यततोध्रुवं ॥ १९ ॥ इति
दशप्रमतेर्वचनामृतंकिलनिपीयतदीयजनास्तदा ॥ कुतुकवारिधिमग्नतद्ददाभव-
न्ननुसएषमहान्जयतीर्थराट् ॥ २० ॥ कतिचिदेषततःखलुवत्सरान्ससमतप्य
तभीमरथीतटे ॥ लसतिसंवसथेहिसरस्वतीप्रतिमयाहरिमारुततुष्टये ॥ २१ ॥
स्वतनयेजननीवदयावतीहारिमरुत्परितुष्टिकरेणसा ॥ सुतपसाप्रससादसरस्वती

द्रुतमहोजयतीर्थयतीश्वरे ॥ २२ ॥ कृतिविलेखनसाधनमायसंसुनिशिताग्रमदा
त्क्रमुकंचसा ॥ विवरणानिलिखन्परिशोधयातउरुबोधनिबंधततेरिति ॥ २३ ॥
इतिसुसंध्यदशाप्तसमीहितोरुकरुणःप्रणिपत्यसरस्वतीं ॥ स्वगुरुराजपदाब्ज---
दिदृक्षयाकिलतदीयनियोगमथाददे ॥ २४ ॥बहुगुहंयरगोलमहीधरंगगनचुंबि-
नमुन्नतसानुभिः ॥ स्वगुरुराजमृगेंद्रनिकेतनंसयुवसिंहइवप्रससादतं ॥२५॥ व-
रवनानिहितत्रतरुव्रजैर्बहुविधैःफलपुष्पकलाशुभिः ॥ पिकशुकप्रमुखैःशकुनव्रजै
र्विलसितानिमनोहरनिस्वनैः ॥ २६ ॥ सरसिसारसचारुणियन्नगेसुरभिसीतल-
मंदसदागतौ ॥ समवगाह्यसुशंखमुनिःपुराकिलकिरातवरंविमुपादिशत् । २७ ।
सुरनदीप्रवहत्यमलाधुनापरतुलस्यपियत्रसुमल्लिकाः ॥ अपचितेःकरणंखलुकेत
कीकुसुमपूर्वकमस्तिहरेरलं ॥ २८ ॥ तदचलप्रवरालयमेत्यतंनिजगुरुंसमवंदत
सादरं ॥ सुजनपूज्यपदंविमलागमप्रवचनेनिरतंजयतीर्थराट्॥२९॥तमवलोक्य-

शमादिगुणांबुधिंप्रणतवंतममुंपरमादरात् ॥ सजयतीर्थममंदजयास्पदंकरुणया
परयापरिषस्वजे॥३०॥ततउदारमतिर्जयतीर्थराट्स्वविहिताद्भुतकृत्यवरैर्गुरुं॥ स-
मवसन्निकटेपरितोषयन्प्रवचनेनचमध्वकृतेःखिल ॥ ३१ ॥ ततःकदाचिज्जय-
तीर्थराजगुरुर्महान्पूर्णमनोरथोलं ॥ महीबिलेतप्तुमनाइवायात्ककुर्विणीतीरम-
तिप्रशस्तं ॥ ३२ ॥ अक्षोभ्यतीर्थयतिराडथपंचमेन्हिपक्षेसितेवनिबिलेसहिमार्ग-
शीर्षे॥ प्रातःकृतान्हिककृतिःसमुपाविशच्छ्रीमध्वेशरामचरणार्पितचित्तवृत्तिः३३
तत्रश्रीजयतीर्थपूज्यचरणोवृंदावनंगौरवंधीरोथागुरुराड्वियोगनमहाक्लेशापनु-
त्याइव ॥ अन्यद्रूपमिवैतदीयमुपलाग्र्यैःकारयित्वार्हणैरानर्च्यादरतःसमीहित-
करंगोविंदसन्मंदिरं ॥ ३४ ॥ यरगोळमहीधरंततोसौनिजवासोचिततत्रआप्य- १२
माध्वं ॥ समयंप्रवदन्नुवासशिष्यप्रवरेभ्योविहिताश्रमार्हकृत्यः ॥ ३५ ॥ मही-
ध्रेस्मिन्दर्यांसकलसमयारण्यचरणेमहाव्याख्यानादेवसतिजयतीर्थाभिधहरौ ॥

दरंभेजुस्तोकागमनिपुणमत्तद्विपगणःशिवामाहींद्राख्याःनशिवइतिमन्येचकुमृ-
गाः ॥ ३६ ॥ शेषाचार्यसुतश्रीमत्संकर्षणकृतेशुभे ॥ जयतीर्थार्यविजयेसर्गआ-
सीच्चतुर्थकः ॥ ३७ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ छ ॥ ॥ छ ॥

श्रीगुरुभ्योनमः ॥ ॐ आनंदतीर्थसत्तीर्थसमसेवतहंसराट् ॥ तत्वातत्वपयोनीर
भेदवित्ससुमानसः ॥ १ ॥ शुकमुख्यैर्द्विजैर्जुष्टंशंकरादिसुरर्षिभिः ॥ स्वछैःपरम-
हंसैश्चलोकपावनपावनं ॥ २ ॥ समध्वशास्त्रदुग्धाब्धौजयतीर्थद्विजाधिपः ॥ श्रा
वकानेककलभैरभ्रमीतिपुराकिल ॥ ३ ॥ वादींद्राजयतीर्थेंद्रंदिशोदशविदुद्रुवः॥
अजपुंजाइवालोक्यगजेंद्रंविगतांकुशं ॥ ४ ॥ जयतीर्थार्यशिष्येषुप्रगल्भेषुचरत्सु-
कौ ॥ वादिनोनययुःशर्महरिपार्केष्विभाइव ॥ ५ ॥ गुरूरुकरुणासूत्रावृतधीगो
त्रसंगता ॥ जयतीर्थाख्यदुग्धाब्धेर्नानार्थाअथजज्ञिरे ॥ ६ ॥ ब्रह्मसूत्रावलिप्रो-

तभाष्यहारालिभूषणः ॥ तत्वप्रकाशिकालक्ष्मीततःप्रादुरभूत्खलु ॥ ७ ॥ प्रमेय-
दीपिकाचंद्रोगीताभाष्यांवराश्रयः॥ अजनिष्टततस्तस्माद्विद्वत्तापापनोदकृत्॥८॥
अनुव्याख्यानसत्पात्राश्रीमन्यायसुधासुधा॥विबुधैरखिलैःसेव्यामृतदायिन्यभूत्त
तः ॥ ९ ॥ सन्यायदीपिकानामाकौस्तुभोजनिरत्नराट् ॥ गीतातात्पर्यदिव्या-
र्थान्स्वगोभिर्भासयंस्तदा ॥१०॥ प्रमाणलक्षणाद्युच्चपुरुषाणामथोचिताः ॥ न्या-
यकल्पलतापूर्वाःसरसोजज्ञिरेततः ॥ ११ ॥ दुर्मायावादखंडादिटीकाविबुधहेत
यः ॥ निशिताःपरजीवादिभेदकाश्चप्रजज्ञिरे ॥ १२ ॥ ऋग्भाष्यदेवराडर्हःतट्टी-
कैरावतस्ततः ॥ उदभूदप्रतिद्वंद्वोदुर्वाद्यसुरभीषणः ॥ १३ ॥ सन्यायविवृतींद्र-
स्यतट्टीकोच्चैश्रवास्ततः ॥ सूचितोधीरशूराग्र्यैःशंसनीयोजनिष्टहि ॥ १४ ॥ क-
र्मनिर्णयटीकाख्याशतकोटिरजायत ॥ समर्थींद्रादिहृद्भेदपटुःकटुकटुर्ध्रुवं॥१५॥
नयशाखोज्वलोविष्णुःतत्वनिर्णयभूश्रितः ॥ तट्टीकापारिजातोतोजनिष्टाभीष्ट-

दःसतां ॥ १६ ॥ षट्प्रश्नोपनिषद्भाष्यटीकाकल्पतरुस्ततः ॥ याज्ञीयोपनिषद्भा
ष्यटीकासंतानपादपः ॥ १७ ॥ मानपत्थतिमंदारोर्वादालिहरिचंदनं ॥ इत्येवंदे
वतरवःचत्वारोपिप्रजज्ञिरे ॥ १८ ॥ एवंविधमहिम्नोस्यजयतीर्थपयोनिधेः ॥ मा-
हात्म्यंकेनवावर्ण्यंलोकपावनपावनं ॥ १९ ॥ अद्यापिहियदुद्भूतानर्थान्नानावि--
धानहो ॥ श्रुत्वादृष्ट्वाप्रमोदंतेविदोशेषाअपीहकौ ॥ २० ॥ मतस्थाविमतस्था
इत्यपहायांतरंविदः ॥ वीक्ष्याद्भुतान्निबंधांस्तान्स्तुवंतःकंपयंतिकं ॥ २१ ॥ ज--
यतीर्थमहाचार्यांचित्रचर्यैसमर्चयन् ॥ वादिराजैःपुराचारुवचनप्रसवैरिति । २२ ।
दृष्ट्वाश्रीजयतीर्थार्यैःसरसेनत्हृदामहान् ॥ पौर्णबोधनिबंधाग्र्यान्स्वबंधूनिवस
स्वजे ॥ २३ ॥ ततोविज्ञातभावःसंयोजयामाससूत्धवः ॥ स्वटीकादारिकाग्र्याभिः
तान्निबंधवरानसौ ॥ २४ ॥ अत्यद्भुतस्वधीभार्याजाताभिर्ललितैःपदैः ॥ लसंती-
भिर्महाभावैर्दृश्याभिःसरसैर्नृभिः ॥ २५ ॥ प्रदायान्योक्तिकादासीर्विद्वधृदयमंदि

रं ॥ प्रौढवृत्तिर्महावृत्तिरसौप्रादात्तदामुदा ॥ २६ ॥ अन्योन्ययोगमालोक्यतेषां-
तासांपुनःपुनः ॥ सआरपरमानंदंततोधन्यतमोहिसः ॥ २७ ॥ यदीयानुपजी-
व्यैवाग्रंथान्सुरतरूनिव ॥ सर्वेपिसज्जनाःसर्ववादींद्रविजयादिकान् ॥२८॥ लौ-
किकींमहतींभूतिंवैदिकींचामृतादिकां॥आप्नुवंतिमहाभागानूनंदेवाधिराडसौ२९
यरगोळगिरेर्दर्यांवर्तमानोजयार्यराट् ॥ पौर्णबोधनिबंधानामकार्षीत्पंचिका।यदा-
॥ ३० ॥ अशेषवेदभाष्याणांनिर्मिताप्रतिमोहियः ॥ विद्यारण्याभिधोमायावा
दींद्रस्सतदागमत् ॥ ३१ ॥ सर्ववादींद्रजयिनंआगतंतज्जिगीषया ॥ वीक्ष्यांते
वासिनःप्रोचुर्जयतीर्थंगुहास्थितं ॥ ३२ ॥ सर्वविद्वज्जयीविद्यारण्यःपार्श्वमुपा-
गतः ॥नान्योमत्तोस्तिसंख्यावानितिगर्वातिरेकवान् ॥ ३३ ॥ तदैवविद्यारंण्ये-
नबहिष्टेनजयार्यराट् ॥ वादीनांतःकइत्युक्तेवाचाहमितिसोगदत् ॥ ३४ ॥ अहं
शब्दंसमाकर्ण्यधैर्यलिंगस्वरोत्थितं ॥ जयार्यस्यमहामोदंप्राप्यवाग्यभ्यवंदत।३५।

प्रश्नप्रत्युत्तरेश्रुत्वाविद्यारण्यजयार्ययोः ॥ तदुत्तराशयाभिज्ञतद्वादिकृतवंदनं।३६।
प्रत्यक्षेणानुभूयालंतदीयायेतदीयकाः ॥ जनाःसर्वेपिसंप्रापुरतिवेलकुतूहलं३७
ततःसभाजनीयंतंसंभाव्यजयतीर्थराट् ॥ प्रोवाचवेदभाष्यादिकर्तेतिश्रूयतेभवा
न् ॥ ३८ ॥ प्रमाणलक्षणव्याख्यांविदधातुभवानलं ॥ एवंचेनोमहांस्तोषोवि-
द्यारण्यभवेदिति ॥ ३९ ॥ इत्युक्त्वाजयतीर्थार्यःतद्धस्तेप्रददौकिल ॥ विहायस्व-
कृतांटीकांकेवलंमानलक्षणं ॥ ४० ॥ क्रियासमभिहारेणसमलोक्यापियत्नतः
व्याख्यातुंनशशाकैषःसर्वतंत्रविदप्यहो ॥ ४१ ॥ सर्वाणिरभवद्विद्यारंण्योथप्रह
संनिति ॥ महोन्मत्तप्रलपितमिदंग्रंथंनचैषभो ॥ ४२ ॥ व्यदर्शयत्ततष्टीकांस्व--
कृतांकौतुकावहां ॥ जयार्यस्यत्रिपादांत्रिंसंगत्यर्थाशयोज्वलां ॥ ४३ ॥ वादि-
राडीक्ष्यतट्टीकांमग्नःकुतुकवारिधौ ॥ शशंसशंसनीयंतंभूशंसद्गुणसारवित्।४४।
ततोन्यायसुधादींश्चन्यायरत्नाकरानसौ ॥ जयार्यदर्शतान्पश्यन्चित्रमारपरंकि

ल ॥४५॥ वारणेंद्रंयमारुह्यगतवान्सर्वदिग्जयी ॥ सवादित्रादिसंपत्त्यासत्राभूमं
डलेचरन् ॥४६॥ तंसमारोह्यनागेंद्रंजयतीर्थंजयास्पदं ॥ चारयामासतत्रासौसवा-
दित्रमहंकिल॥४७॥अनन्यविजितेनापिस्वजितेनामुनार्चितः॥अहोसजयतीर्थार्य
इतिकीर्तिरभूत्क्षितौ ॥ ४८ ॥ जयतीर्थार्यसदृशोनभूतोनभविष्यति ॥ इतिवा
णीसमस्तानांननर्तानिनमंडले ॥ ४९ ॥ एवंमहामहिम्न्यस्मिन्वसत्यत्रमहीधरे।
तटाकंबंधयामासकश्चिच्छूद्राधिपस्तदा ॥ ५० ॥ सेतुंसंबंधयामासतटाकेसागरो-
पमं ॥ विधातुमद्रिमध्येलंमहार्थव्ययतः किल ॥ ५१ ॥ महाप्रयत्नबद्धोपिभि-
न्नएवाभवत्तदा ॥ मुहुर्मुहुस्तदासेतुविषंणःकिलसोभवत् ॥ ५२ ॥ दर्यामत्रसमा
सीनंप्रासाद्ययतिपंर्यादे ॥ मुष्टिमात्रमृदंसेतौतेनस्छापयशेतदा ॥ ५३ ॥ अयंसे
तुरभिन्नस्याद्दृढोगाढमितिस्फुटं ॥ दृष्ट्वास्वप्नंसशूद्रार्योविस्मितोलमभूत्किल
॥ ५४ ॥ तपस्वींद्रंसमासाद्यजयतीर्थेंद्रमेषकः ॥ प्रसाद्यकारयामासतथातेनदया

लुना ॥५५॥ ततःप्रभृतितत्सेतुःनस्फुफोटपुनःकिल ॥ तत्तपोनिधिमाहात्म्यात्त
देतंनिर्भराद्भुतं ॥५६॥ तत्सेतुनाविशालेनाकांतेनार्णवसंनिभं ॥ तटाकंशोभते-
द्यापिचलदूर्मिसमाकुलं ॥ ५७ ॥ इत्यद्भुतचरित्राविंधयत्यार्यैशंसितंक्षितौ ॥ स-
त्यासमंसमर्थकःसत्यंसत्यंब्रवीम्यहं ॥ ५८ ॥ इतरोपनिषद्भाष्यटीकाकृतिसया
चने ॥ शिष्यार्यैव्यासतीर्थाख्येटीकानाकृतसस्वयं ॥ ५९ ॥ एवमत्यद्भुताःशि-
ष्याःयत्समानागुणैःक्षितौ ॥ समहान्जयतीर्थार्योदद्यान्मेशोभनांदृशं ॥ ६० ॥
विद्याधिराजतीर्थायमाध्वंसाम्राज्यमादिशत् ॥ अनवद्यांसुविद्यांमदद्यात्सजय-
तीर्थराट् ॥६१॥ अद्भुतान्माध्वशास्त्रार्थान्गोगणैःसमभासयत् ॥ सजयार्यमहा-
सूर्योविभिद्यान्मेतमस्तति ॥ ६२ ॥ योमध्वशास्त्रदुग्धाब्धौचिक्रीडेजयराडिभः ॥
सतत्रमेनिशंक्रीडांप्रतिजन्मप्रयछतु ॥ ६३ ॥ श्रीमन्मध्वकृतांतसंगतकृतीर्यन्नि
र्मितात्यद्भुताःसर्वैर्धीत्यसतांहितत्प्रवचनासत्यारमंतेनिशं ॥ सोसौश्रीजयतीर्थ-

पूज्यचरणोस्वग्रंथसक्तिंपरामस्मिन्जन्मनियावदायुरखिलान्विघ्नांनिवार्यादिशेत्
॥ ६४ ॥ जयतीर्थवचःसुरापगौघःभगवत्पादनितांतसंगपूतः ॥ कुमतोरुतटप्र-
पातवेगोभुवनेपावनपावनःपुनातु॥६५॥ जयजयजयतीर्थतीर्थराजायतमतिवा-
क्सुरनिम्नगाप्रवाहे ॥ त्वदमलवचनेनजासमेतेप्रादिशममाप्लवनंसदातिपुंण्यं।६६।
मुखसहस्रकवर्ण्यचरित्रधेःजयमुनेर्महिमेषदिहोच्यते ॥ तदुरुभक्तिवशास्यविभूष
णंभवतुकार्यकृतेप्रवरंममा ॥ ६७ ॥ जयतीर्थत्द्वदावासाःनंदतीर्थरघूत्तमौ ॥ प्री-
येतांजयतीर्थेंद्रविजयेनामुनामम ॥ ६८ ॥ शेषाचार्यसुतश्रीमत्संकर्षणकृतेशु--
भे ॥ जयतीर्थार्यविजयेसर्गोयंपंचमोजनि ॥ ६९ ॥ इति श्रीछलारिनृसिंहाचा-
र्य शिष्य शेषाचार्य सुत संकरषणविरचिते जयतीर्थविजयः समाप्ता श्रीकृष्णा
र्पणमस्तु ॥ श्रीमट्टीकाकृत्पादमहानुभावगुरुराजोविजयते ॥ ॥ छ ॥

ई पुस्तकवु बेळगांवियल्ली भिकाजी हरी सामंत इवरु तंम बेळगांवसमाचार छापखानेयल्ली छापिसि प्रसिद्ध माडिदरु. शके १८०३

॥ इति श्री जयतीर्थ विजय समाप्तः ॥